दर्शपूर्णमास हौत्र

मग: ४ए४
दु 36
६१३

शि. प्र. मंडळी, पुणे ९.
मीमांसा विद्यालय
ग्रंथालय
ग्रंथ नाव दर्शपूर्णमास हौत्र-प्रयोग: (लिखित)
लेखक

621
15

अथदर्शपुर्णमासहोत्रप्रयोगप्रा

अथ दर्श पुर्णमास

363

हौत्र

द॰पू॰ श्रीगणेशाय नमः ॥ अथ दर्शपूर्णमासहोत्रप्रयोगः ॥ विहारा
३ द्बहिः शुध्यर्थं प्राङ्मुखोदङ्मुखो वा बहिराचम्य होतरेहीत्यामंत्रितः
प्रागुदगाहवनीयादवस्थाय प्राङ्मुखो यज्ञोपवीत्याचम्य दक्षि
णाद्विहारं प्रपद्यते पूर्वेणोत्करमपरेण प्रणीता इध्ममपरेणा प्रणी
तेचात्वालं चात्वालवत्स्वेतत्तीर्थमित्याचक्षते ॥ प्रपद्याभिहृतत्तरेण पा
देन वेदिश्रोण्योरन्तरपादं मंडूरसमांनिधाय प्रपदेन बर्हिराक्रम्य संहि
तोपाणी धारयन्नाकाशायत्यंगुलीर्हृदयसंमितावंकसंमितौ वाद्या
वापृथिव्योः संधिमीक्षमाण एतज्जानुरच्छानमासनं वा सर्वत्रैवं भूतो ३
वचनादन्यत्प्रेषितो जपति ॥ नमः प्रवक्त्रे नम उपद्रष्ट्रे नमोनुख्यात्रेक

इदमनुवक्ष्यतिस इदमनुवक्ष्यतिषण्मोर्वीरंहसस्पांतु द्यौश्चपृथि
वीचाहश्चरात्रिश्चापश्चौषधयश्चवा। कस्मस्त्वितयज्ञः साधुछंदां
सिप्रपद्येहमेवमां॥अमुकशर्माणंस्वनामगृहीत्वा॥भूतंभविष्य
तिजातंजनिष्यमाणआभजाम्यपाव्यंवाचोअशांतिंवह॥इत्यंगु
ल्यग्राण्यवकृष्य॥जातवेदोरमयापश्रून्मयीतिप्रतिसंदध्यात्॥
वर्ममेद्यावापृथिवीवर्माग्निवर्मसूर्योवर्ममेसंतुतिरश्चिकाः॥
तदद्यवाचः प्रथमंमसीययेनासुरांऽअभिदेवाअसाम॥ऊर्जाद
उतयज्ञियासः पंचजनाममहोत्रंजुषध्वं।इतिजपित्वाऽभिहिंकृ
त्य।हिंउभूर्भुवः स्वरोंप्रवोवाजाअभिद्यवोहविष्मंतोघृताच्या।दे
वान्जिगातिसुम्नयो।उभ[?]प्रवोवाजा० ताच्या।देवान्जिगातिसुम्न

स॰पू॰ योऽ३ग्नदेवोवाजाअं॰ घृताच्याहेवाजिगातिसक्मनयो३ मग्नआया
२ हिवीतयेगृणानोहव्यदातये॥ निहोतासत्सिवर्हिषो३ न्तंत्वास
मिद्भिरंगिरोघृतेनवर्धयामसि॥ बृहच्छोचायविष्ठ्या३ म्सनःपृ
थुश्रवाय्यमच्छादेवविवाससि॥ बृहदग्नेसुवीर्यो३ मीळेन्योनम
स्यस्तिरस्तमांसिदर्शतः॥ समग्निरिध्यतेवृषों३ वृषोअग्निःस
मिध्यतेश्वोनदेववाहनः॥ तंहविष्मंतईळतो३ वृषणंत्वावयंवृष
न्वृषणःसमिधीमहि॥ अग्नेदीद्यतंबृहों३ मग्निंदूतंवृणीमहेहो
तारंविश्ववेदसं॥ अस्ययज्ञस्यसुक्रतों३ समिध्यमानोअध्वरेग्निः
पावकईड्यः॥ शोचिष्केशस्तमीमहों३ समिद्धोअग्नआहुतदेवा २
न्यक्षिस्वध्वर॥ त्वंहिहव्यवाळसों३ माजुहोताग्निंप्रयत्यध्वरे॥ वृ

णीध्वंहव्यवाहनो३माजुहोतातुवस्य॰ध्वरेषु॥ वृणीध्वंहव्यवाह
नो३माजुहो॰ध्वरेषुवृणीध्वंहव्यवाहनो३मग्नेमहां३असिब्रा
ह्मणभारत॥ इतिनिगदेवसाययजमानस्यार्षेयान्प्रवृणी
न्वि ते। देवेद्धोमन्विद्धऋषिष्टुतोविप्रानुमदितः कविशस्तोब्रह्मसं
शितोघृताहवनः प्रणीर्यज्ञानांरथीरध्वराणा। मतूर्तोहो
तातूर्णिर्हव्यवाट्। इत्यवसाय। आँस्यात्रंजुहूर्देवानांचमसो
देवपानोरांइवाग्नेनेमिर्देवांस्त्वंपरिभूरस्यावहदेवान्यजमा
नाय। अग्निमग्नआवह। सोममा३वह॥ अग्निमा३वह। उपां
शुविष्णुमुच्चैः आ३वह। अग्नीषोमौमा३। इंद्रंवैमृधमा३वह।

द॰ पू॰ देवाँआज्यपाँआ३वह। अग्निंहोत्रायावहस्वंमहिमानमा३
२ वह। आवहजातवेदः सुयजायज। दर्शेविद्दमोरनंतरइंद्राग्नी
आ३वह। देवाँआज्यपामित्यादि। यथाखिलतमूर्ध्वजानुरूपवि
श्योदग्वेदसुस्पृशणानिभूमौप्रादेशंकुर्यात्॥ ओदिनिर्भाला
यांतरिक्षान्माछेत्सीरिदमहमग्निनादेवेनदेवतयात्रिवृ
तास्तोमेनरथंतरेणसाम्नागायत्रेणछंदसाग्निष्टोमेनय
ज्ञेनवषट्कारेणवज्रेणयोस्मान्द्वेष्टियंचवयंद्विष्मस्तंहन्मि।
आश्रावयिष्यंतमध्वर्युमनुमंत्रयते॥ आश्रावययज्ञंदेवेभ्यःश्राव
यमांमनुष्येषुकीर्त्यैयशसेब्रह्मवर्चसायेतिमिदृणानं। देवसवित

रेतंत्वावृणतेग्निंहोत्रायसहपित्रावैश्वानरेणद्यावापृथिवीमां
पातामग्निर्होताहंमानुषः।मानुषइत्यध्वर्योःकृत्वा॥उदायु
षास्वायुषोदोषधीनांरसेनोत्पर्जन्यस्यधामभिरुदस्थाममृ
ताँअनु।उत्तिष्ठेत्।दक्षिणाध्वर्योनिवर्तिश्वपाशाअग्निंहोतार
मंतराविचित्ताः॥सिनातिपाकमतिधीरएतीयुसायजेपत॥कं
तस्यपंथामन्वेमिहोता॥अभिक्रम्यांसेध्वर्युमन्वारभेतपार्श्वे
स्थेनपाणिनाग्नीध्रमेकदेशेनसव्येनवा।इंद्रमन्वारभैहोतृवू भामहे
र्यैपुरोहितं॥येनायत्त्रुत्तमंस्वर्देवाअंगिरसोदिवं॥संमार्गेत
णेस्त्रिराभ्यात्मेसुखंसंम्मजीत।संमार्गोसिसंमांप्रजयापश्
भिम्रद्धि।सकृन्मंत्रेणद्विस्तूष्णींसएष्टाद्रकं।दक्षिणाहहोतृप
दनस्यात्तरेणगत्वासव्यांसेनाहसहोत्पदनस्यपश्चात्प्राङ्गु

द॰ पू॰ स्तोभस्ताहोतृषदनमभिमंत्रयते॥ अहेदैधिषव्योदतस्तिष्ठान्य
४ स्यसदनेसीदयोस्मत्पाकतरः। अंगुष्ठोपकनिष्ठिकाभ्यांहोतृष
दनात्तृणंप्रत्यग्दक्षिणानिरसेस्मिन्निरस्तः परावसुः॥ अपउप
स्पृश्य॥ इदमहमर्वावसोः सदनेसीदामीत्युपविशेद्दक्षिणोत्तरे
णोपस्थेन। देवबर्हिः स्वासस्थंत्वाध्यासदेयं॥ अभिहिंषहोतः प्र
तरांबर्हिषद्भव॥ जानुशिरसाबर्हिरुपस्पृश्याथऊर्ध्वंजपेत्। भूप
तयेनमोभुवनपतयेनमोभूतानांपतयेनमोभूतयेनमः प्राणं
प्रपद्येपानंप्रपद्येव्यानंप्रपद्येवाचंप्रपद्येचक्षुः प्रपद्येश्रोत्रंप्रप
द्येमनः प्रपद्येआत्मानंप्रपद्येगायत्रींप्रपद्येत्रिष्टुभंप्रपद्येजग ४
तींप्रपद्येनुष्टुभंप्रपद्येछंदांसिप्रपद्ये॥ सूर्योनोदिवस्पातुवातो
अंतरिक्षात्। अग्निर्नः पार्थिवेभ्यः। नमोमहद्भ्योनमोअर्भके

भ्योनमोयुवभ्योनमआशिनेभ्यः॥ यजामदेवान्यदिशक्नवा
ममाज्यायसःशंसमावृक्षिदेवाः॥ विश्वेदेवाःशास्तनमा
यथेहहोतावृतोमनवैयंनिषद्य॥ प्रमेब्रूतभागधेयंयथावो
येनपथाहव्यमावोवहानि॥ अराधिहोतानिषदायजीयान
भिप्रयांसिसुधितानिहिख्यत्॥ यजामहेयज्ञियान्हंतदेवां
ईळामहाईड्यांआज्येन॥ तदद्यवाचःप्रथमंमसीययेनासु
रांअभिदेवाअसाम॥ ऊर्जादउतयज्ञियासःपंचजनाममहो
त्रंजुषध्वं॥ प्रतीक्षइध्मेस्रुचावामाहाययेनिगदेन। अग्निर्होता
वेत्वग्नेर्होत्रंवेतुप्रावित्रंसाधुतेयजमानायदेवतायोअग्निं।
होतारमवृथाइतिजपेत्। घृतवतीमध्वर्योःस्रुचमास्यस्वदे

द॰ पू॰ वँयुवंविश्ववारेईळामहेदेवांईळेन्यान्नमस्यामनमस्यान्यजामयज्ञियान्॥
५ ये३यजामहेसमिधःसमिधोअग्नआज्यस्यव्यंतु३वौ३षट्॥वागोजःसह
ओजोमयिप्राणापानौ॥वषट्कारमुक्त्वोक्तानुमंत्रयते॥ये३यजामहेत
नूनपादग्नआज्यस्यवेतु३वौ३षट्॥वागो०॥वसिष्ठशुनकात्रिवध्र्यश्व
राजन्यानामयंद्वितीयः॥येयजामहेनराशंसोअग्नआज्यस्यवेतु३वौ३
षट्।वागो०ये३यजामहेइळोअग्नआज्यस्यव्यंतु३वौ३षट्।वागो०।ये३
यजामहेबर्हिरग्नआज्यस्यवेतु३वौ३षट्॥वागो०॥ये३यजामहेस्वाहा
ग्निंस्वाहासोमंस्वाहाग्निंस्वाहाउपांशुविष्णुंउच्चैःस्वाहाग्नीषोमौ
स्वाहेंद्रंवैमृधंस्वाहादेवाआज्यपाजुषाणाअग्नआज्यस्यव्यंतु३वौ३ष
ट्॥दर्शेविष्णोरनंतरं॥स्वाहेंद्राग्नीस्वाहादेवाआज्यपाइत्यादि॥वार्त्र ५
घ्नावाज्यभागौ॥अग्निर्वृत्राणिजंघनद्द्रविणस्युर्विपन्यया॥समिद्धः

शुक्रआऽकृतोंऽ३॥ ये३यजामहेऽग्निंजुषाणोऽअग्निराज्यस्यवेतु३वौ३
षट्॥ वागो०॥ त्वंसोमासिसत्पतिस्त्वंराजोतवृत्रहा॥ त्वंभद्रोअसि
क्रतोंऽ३॥ ये३यजामहेसोमंजुषाणः सोमआज्यस्यहविषोवेतु३वौ३
षट्॥ वागो०॥ इतिपौर्णमास्यां॥ दर्शेतु। वृधन्वंतावाज्यभागौ॥ अग्निः
प्रत्नेनमन्मनाशुंभानः स्तन्वंस्वां॥ कविर्विप्रेणवावृधोंऽ३॥ ये३यजामहेऽग्निं
जु० वेतु३वौ३षट्॥ वागो०॥ सोमगीर्भिष्ट्वावयंवर्धयामोवचोविदः॥ सुमृ
ळीकोनआविशोंऽ३॥ ये३यजामहेसोमंजुषा० वेतु३वौ३षट्। वागो०॥
अथप्रधानस्य॥ वेत्थाहिवेधोअध्वनः पथश्चदेवांजसा॥ अग्नेयज्ञेषु
सुक्रतोऽ३म्॥ उच्चैः ओंऽ३॥ ये३यजामहेउपांशुअग्निंपथिकृतंआदेवाना
मपिपंथामगन्मयच्छक्रवामतदनुप्रवोढुं॥ अग्निर्विद्वान्त्सयजात्सेदुहो

ए॰ प्र॰ तासोअध्वरांत्सक्रतून्कल्पयाती३ उच्चैः वौ३षट्॥ अग्निर्मूर्धा दि
६ वः ककुत्पतिः पृथिव्याअयं॥ अपांरेतांसिजिन्वतों३॥ ये३ यजाम
हेग्निंभुवोयज्ञस्यरजसश्चनेतायत्रानियुद्भिः सचसेशिवाभिः॥
दिविमूर्धानंदधिषेस्वर्षांजिह्वामग्नेचकृषेहव्यवाहंवौ३षट्॥ वागो॰
विष्णुरपांसु॥ इदंविष्णुर्विचक्रमेत्रेधानिदधेपदं॥ समूढमस्यपां
सुरे॥ उच्चैः वौ३षट्॥ ययजामहेविष्णुस्त्रिर्देवः पृथिवीमेषएतांवि
चक्रमेशतर्चसंमहित्वा॥ प्रविष्णुरस्तुतवसस्तवीयांत्वेषंह्यस्यस्थ
विरस्यनाम३ उच्चैः वौ३षट्॥ वागो॰॥ अग्नीषोमासवेदसासहू
तीवनतंगिरः॥ संदेवत्राबभूवथों३॥ ये३ यजामहेग्नीषोमौसुवमेता ६
निहविरोचनान्यग्निश्चसोमसक्रतूअधत्तं॥ युवंसिंधूंरभिशस्ते

रवधारग्नीषोमाविमुंचतं गृभीता३ न्वौ३ षट् ॥ वागो० ॥ विन इंद्र म
धो जहि नीचा यच्छ पृतन्यतः ॥ यो अस्माँ३ अभिदासत्यधरं गमया
तमों३ ॥ ये३ यजामहे इंद्रं वैमृधं मृगो न भीमः कुचरो गिरिष्ठाः प
रावत आजगंथा परस्याः ॥ सृकं संशाय पविमिंद्र तिग्मं वि शत्रूंता
ढि वि मृधो नुदस्वा३ वौ३ षट् ॥ वागो० ॥ हर्षो विहेमारनंतरं ॥ इंद्राग्नी
अवसागतमस्मभ्यं चर्षणीसहा ॥ मानो दुःशंस ईशता३ ॥ ये३ य
जामहे इंद्राग्नी गीर्भिर्विप्रः प्रमतिमिच्छमान ईट्टे रयिं यशसं पू
र्वभाजं ॥ इंद्राग्नी वृत्रहणा सुवज्रा प्रनो नव्येभिस्तिरतं देष्णैर्वौ३
षट् ॥ वागो० ॥ अथ सन्नयतः ॥ एंद्र सानसिं रयिं सजित्वानं सदा
सहं ॥ वर्षिष्ठमूतये भरा३ ॥ ये३ यजामहे इंद्र प्रससाहिषे पुरुहूत
शत्रूंज्येष्ठस्ते शुष्म इह रातिरस्तु ॥ इंद्रा भर दक्षिणेना वसूनि पतिः

द-पू-

७

सिंधूनामिवरेवतीनांयो३षट्॥वागेत॰॥महेंद्रस्य॥मंहां३इंद्रो
यओजसापर्जन्योवृष्टिमां३इव॥स्तोमैर्वत्सस्यवावृधो३॥ये३
यजामहेइंद्रंभुवस्त्वमिंद्रब्रह्मणामहान्भुवोविश्वेषुसवनेषुयज्ञि
यः॥भुवोनॄंश्च्यौत्नोविश्वस्मिन्भरेज्येष्ठश्चमंत्रोविश्वचर्षणा३
वौ३षट्॥वागेत॰॥अथस्विष्टकृताहि॥पिप्रीहिदेवां३उशतोयविष्ठ
विद्वाँऋतूंऋतुपतेयजेह॥येदैव्याऋत्विजस्तेभिरग्नेत्वंहोतॄणाम
स्यायजिष्ठो३॥ये३यजामहेग्निंस्विष्टकृतमयाळग्निरग्नेःप्रिया
धामान्ययाट्सोमस्यप्रियाधामान्ययाळग्नेःप्रियाधामान्ययाट्
उपांशुविष्णोःउत्त्वेःप्रियाधामान्ययाळग्नीषोमयोःप्रियाधामान्ये
याळिंद्रस्यवैमृधस्यप्रियाधामान्ययाड्देवानामाज्यपानांप्रिया ७

धामानि॥ यक्ष्यग्नेर्होतुः प्रियाधामानियक्षत्स्वंमहिमानमा
यजतामेज्याइषः कृणोतुसोअध्वराजातवेदाजुषतांहविरग्नेयद
द्यविशोअध्वरस्यहोतःपावकशोचेवेष्ट्वंहियज्वा॥ ऋतायजासि
महिनावियद्भूर्हव्यावहयविष्ठयातेअद्याउवोऽ२पद्॥ वागो १॥
दर्शविह्मोरनंतरं॥ न्ययाडग्नेः प्रियाधामान्ययाड्देवाना
माज्यपानांप्रियाधामानियक्ष० इत्यादि०॥ प्रदेशिन्याः पर्वाणि
उत्तमेअंजयित्वोष्ठयोरभ्यात्मंनिमार्ष्टि॥ वाचस्पतिनातेहुतस्य
षप्राणायप्राश्नामि॥ मनसस्पतिनातेहुतस्योर्जेपानायप्राश्ना
मि॥ उत्तरमुत्तरेअधरमधरेस्पृष्ट्वोदकं॥ अंजलिनैकांग्रग्रहसव्ये
पाणौकृत्वापश्चाद्दस्याउदगंगुलिंपाणिमुपधायावांतरेळामवदा
पयीतांतरणांगुष्ठमंगुलीभिश्चसंयांछितीयमादद्दीतप्रत्यालभ्यामं

द.पू.
९

गुष्ठेनाभिसंगृह्य प्रत्याहृत्यांगुलीरमुष्टिंकृत्वादक्षिणतइळां
परिगृह्यास्यसंमितामुपह्वयतेप्राणसंमितांवा॥इळोपहूतासह
दिवाबृहतादिव्येनोपास्मांइळाह्वयतांसहदिवाबृहतादिव्येने
ळोपहूतासहांतरिक्षेणवामदेव्येनवायुनोपास्मांइळाह्वयतां
सहांतरिक्षेणवामदेव्येनवायुनेळोपहूतासहपृथिव्यारथंतरेणा
ग्निनोपास्मांइळाह्वयतांसहपृथिव्यारथंतरेणाग्निना॥उपहू
तागावःसहाशिरउपमांगावःसहाशिराह्वयंतामुपहूताधेनुःस
हऋषभोपमांधेनुःसहऋषभाह्वयतामुपहूतागोर्घृतपद्युपमां
गोर्घृतपदीह्वयतामुपहूतादिव्याःसप्तहोतारउपमांदिव्याःसप्त
होतारोह्वयंतामुपहूतःसखाभक्षउपमांसखाभक्षोह्वयतामुपहू

तेळावृष्टिरुपमामिळावृष्टिर्ह्वयतां॥इत्युपांश्वथोच्चैः॥इळोपहू
तोपहूतेळोपास्मांइळाह्वयतामिळोपहूता॥मानवीघृतपदीमै
त्रावरुणीब्रह्मदेवकृतमुपहूतंदैव्याअध्वर्यवउपहूताउपहूता
मनुष्याः॥यइमंयज्ञमवान्येचयज्ञपतिंवर्धानुपहूतेद्यावापृथि
वीपूर्वजेऋतावरीदेवीदेवपुत्रे॥उपहूतोयंयजमानउत्तरस्यांदेवय
ज्यायामुपहूतोभूयसिहविष्करणइदंमेदेवाहविर्जुषंतामितित
स्मिन्नुपहूतः॥इत्युपहूतायामवांतरेळांप्राश्नीयात्॥इळेभागंजु
षस्वनःपिन्वगाजिन्वार्वतोरायस्पोषस्यशिषे॥तस्यनोरास्वतस्य
नोदास्तस्यास्तेभागमशीमहि॥सर्वात्मानःसर्वतनवःसर्ववीराः
सर्वपूरुषाः॥सर्वपूरुषाइतिवा॥अवांतरेळांप्राश्याचमियात्॥मा
र्जयित्वानुयाजैश्चरंति॥परिस्तरणेरंजलिमंतर्धायापआसेचय

द॰पू॰ ९ तेतन्मार्जनं ॥ अन्वाहार्यस्यं भागं प्रतिगृह्णाति । क इदं कस्मा अदात्का
मः कामायादात्कामो दाता कामः प्रतिग्रहीता कामं समुद्रमाविश का
मेन त्वा प्रतिगृह्णामि कामैतत्ते वृष्टिरसि द्यौस्त्वा ददातु पृथिवी प्रति
गृह्णातु । अथानुयाज्याः । देवं बर्हिर्वसुवने वसुधेयस्य वेतु ३ वौ ३
षट् । वागो॰ । देवो नराशंसो वसुवने वसुधेयस्य वेतु ३ वौ ३ षट् । वा
गो॰ । देवो ३ अग्निः स्विष्टकृत्सुद्रविणा मंद्रः कविः सत्यमन्मा
यजी होता होतुर्होतुरायजीयानग्ने यान्देवानयाड्यॉं अपिप्रेये
ते होत्रे अमत्सत ॥ तांससनुषीं होत्रान्देवं गमान्दिवि देवेषु यज्ञ ९
मेरयेमं स्विष्टकृच्चाग्ने होता भूर्वसुवने वसुधेयस्य नमोवाके वी ।

प्र०

हीउवोउषट्॥ वागो०॥ सूक्तवाकायसंप्रेषितः॥ इदंद्यावापृथि
वीभद्रमभूदार्ध्मसूक्तवाकमुतनमोवाऋध्यास्मसूक्तोच्यमग्ने
त्वंसूक्तवागसि॥ उपश्रुतीदिवस्पृथिव्योरोमन्वतीतेस्मिन्यज्ञेयज
मानद्यावापृथिवीस्तां॥ शंगयीजीरदानूः अत्रस्नूअप्रवेदेउरू यी ४
गव्यूतीअभयंकृतौ॥ वृष्टिद्यावारीत्यापाशंभुवौमयोभुवाऊर्ज
स्वतीपयस्वतीसूपचरणाचस्वधीचरणाचतयोराविदीत्यवसा
या॥ अग्निरिदंहविरजुषतावीवृधतमहोज्यायोकृत॥ सोमइदं
हविर०॥ अग्निरिदंह०॥ उपांशुविष्णुः उच्चैः हविर०॥ अग्नीषोमा
विदंहविरजुषेतामवीवृधेतांमहोज्यायोक्रातां॥ इंद्रोवैमृधइदं०
कृत॥ देवाआज्यपाआज्यमजुषंतावीवृधंतमहोज्यायोकृत॥

द॰पू॰ आग्निर्होत्रेणेदंहविरजुषतावीवृधत॰ कृत॥ दर्शविकृत्योरनंतरं॥
१० इंद्राग्नीइदंहविरजुषेतामवीवृधेतांमहोज्यायोक्रातां॥ देवाआ
ज्यपाइत्यादि॥ अस्यामृधेद्धोत्रायांदेवंगमायामाशास्तेयय
जमानः॥ यजमानोनक्षत्रनाम्ना॥ आयुराशास्तेसुप्रजास्त्व
माशास्तेरायस्पोषमाशास्तेसजातवनस्यामाशास्तेउत्त
रांदेवयज्यामाशास्तेभूयोहविष्करणमाशास्तेदिव्यंधामाशा
स्तेविश्वंप्रियमाशास्तेयदनेनहविषाशास्तेतदस्यात्तदृध्यात्त
दस्मैदेवारासंतांतदग्निर्देवोदेवेभ्योवनतेवयमग्नेर्मानुषाः॥ १०
इष्टंचवीतंचाभूदुभेद्यावापृथिवीअंहसस्पातामिहगतिर्वामस्ये चैनो २
दंनमोदेवेभ्यः॥ शंयुवाकायसंप्रेषितः॥ तच्छंयोरावृणीमहे

गातुंयज्ञायगातुंयज्ञपतयेदैवीस्वस्तिरस्तुनः स्वस्तिर्मानुषे
भ्यः॥ऊर्ध्वंजिगातुभेषजं॥शन्नोअस्तुद्विपदेशंचतुष्पदे॥वेद
मसेमेप्रयच्छस्वध्वर्युरलंगृह्णीयात्॥वेदोसिवेदोविदेय॥उरा
युषास्वायुषोदोषधीनांरसेनोत्पर्जन्यस्यधामभिरुदस्थाम
मृतांअनु॥एतेनोपाथ्यायपश्वाद्गार्हपत्यस्योपविश्यपत्नी
संयाजैश्चरंति॥आप्यायस्वसमेतुतेविश्वतःसोमवृष्ण्यं॥
भवावाजस्यसंगथेउ॥येउयजामहेसोमंसंतेपयांसिसमु
यंतुवाजाःसंवृष्ण्यान्यभिमातिषाहः॥आप्यायमानोअमृ
तायसोमदिविश्रवांस्युत्तमानिधिष्व॥वौउषट्॥वागोजः॥
इहत्वष्टारमग्रियंविश्वरूपमुपह्वये॥अस्माकमस्तुकेवलोउ॥

दे.पू. ये३यजामहेत्वष्टारंतन्नस्तुरीपमधपोषयित्नुदेवत्वष्टर्विरराणस्य
स्व॥यतोवीरःकर्मण्यःसुदक्षोयुक्तग्रावाजायतेदेवकामा३वौ३
११ षट्॥यागो॥देवानांपत्नीरुशतीरवन्तुनःप्रावन्तुनस्तुजयेवाज
सातये॥याःपार्थिवासोयाअपामपिव्रतेतानोदेवीःसुहवाःश
र्मयच्छन्तो३॥ये३यजामहेदेवानांपत्नीरुतग्नाव्यन्तुदेवपत्नीरिन्द्रा
ण्यग्नाय्यश्विनीराट्॥आरोदसीवरुणानीशृणोतुव्यन्तुदेवीर्य
ऋतुर्जनीनां३वौ३षट्॥यागो॥अथप्रजाकामाश्चेत्प्रागगृह
पतेर्यजेत॥राकामहंसुहवांसुष्टुतीहुवेशृणोतुनःसुभगा
बोधतुत्मना॥सीव्यत्वपःसूच्याच्छिद्यमानयाददातुवीरंश ११
तदायमुक्थ्यं३॥ये३यजामहेराकांयास्तेराकेसुमतयःसु

पेशसोयाभिर्ददासिदाशुषेवसूनि॥ताभिर्नोअद्यसुमनाउ
पागहिसहस्रपोषंसुभगेरराणा३वौ३षट्॥वागो१॥सिनीवा
लिपृथुष्टुकेयादेवानामसिस्वसा॥जुषस्वहव्यमाहुतंप्रजांदे
विदिदिड्ढिनः३॥ये३यजामहेसिनीवालींयासुबाहुःस्वंगु
रिःसुषूमाबहुसूवरी॥तस्यैविश्पत्न्यैहविःसिनीवाल्यैजुहो
तना३वौ३षट्॥वागो०॥कुहूमहंसुवृतंविद्मनापसमस्मि
न्यज्ञेसुहवांजोहवीमि॥सानोददातुश्रवणंपितॄणांतस्यैते
देविहविषाविधेम३॥ये३यजामहेकुहूंकुहूर्देवानाममृ
तस्यपत्नीहव्यानोअस्यहविषःशृणोतु॥संदाशुषेकिरतुभू
रिवामंरायस्पोषंयजमानेदधातु३वौ३षट्॥वागो०॥अनु

द०पू नोद्यानुमतिर्यज्ञंदेवेषुमन्यतां॥अग्निश्चहव्यवाहनोभवतंदा
शुषेमयोॆ३॥येउयजामहे अनुमतिमान्विदनुमतेत्वंमन्यासे
१२ शंचनस्कृधि॥क्रत्वेदक्षायनोहिनुप्रणआयूंषितारिषाउ
षौ३षट्॥वागो०॥अग्निर्होतागृहपतिःसराजाविश्वावेदज
निमाजातवेदाः॥देवानामुतयोमर्त्यानांयजिष्ठःसप्रयजता
मृतावों३॥येउयजामहेग्निंगृहपतिंहव्यवाळग्निरजरःपिता
नोविभुर्विभावासुदृशीकोअस्मे॥सुगार्हपत्याःसमिषोदिदी
ह्यस्मध्यक्संमिमीहिश्रवांसी३वौ३षट्॥वागोजःसहओजो
मयिप्राणापानौ॥अंगुलिपर्वंजनादिपूर्ववत्॥आज्येपाणि १२
तलेवद्दापयीतेळामुपह्वूयसर्वंप्राश्नीयात्॥शंयुवाकोभवेन्नवा॥

वेदंपत्न्यैप्रदायवाचयेद्धोताध्वर्युर्वा ॥ वेदोसिवित्तिरसिविदेयक
र्मासिकरणमसिक्रियासंसनिरसिसनितासिसनेयंघृतवंतंकु
लायिनंरायस्पोषंसहस्रिणंवेदोददातुवाजिनं ॥ यंबहवउपजीवं
तियोजनानामसद्वशी ॥ तंविदेयप्रजांविदेयकामायत्वा ॥ वेदं
शिरसांनाभिदेशमालभेततथप्रजाकामाचेत् ॥ अथास्यायोक्त्रंवि
चृतति ॥ प्रत्वामुंचामिवरुणस्यपाशाद्येनत्वाबध्नात्सवितासुशेवः
॥ ऋतस्ययोनौसुकृतस्यलोकेरिष्टांत्वासहपत्यादधामि ॥ तस्य
स्यगार्हपत्याद्दक्षिणंयोक्त्रपाशंनिधायोपरिष्टादस्याअंगयाणिवि
दृढणानिकरोतिपुरस्तात्पूर्णपात्रंसंस्थाप्यवेदेनैरभिमृश्यवा
चयेत् ॥ पूर्णमसिपूर्णंमेभूयाः सुपूर्णमसिसुपूर्णंमेभूयाः सद
सिसन्मेभूयाः अक्षितिरसिमामेक्षेष्ठाः ॥ इतिजपित्वा ॥ अथैनंपूर्णं

द॰पू पात्रात्प्रतिदिशमुदकमडुक्षन्नुडुक्षंतींवाचयति॥ प्राच्यांदिशिदे
वाऋत्विजोमार्जयंतां॥ दक्षिणस्यांदिशिमासाःपितरोमार्जयं
१३ तां॥ प्रतीच्यांदिशिगृहाःपशवोमार्जयंतां॥ उदीच्यांदिश्यापऊ
षधयोवनस्पतयोमार्जयंतां॥ ऊर्ध्वायांदिशियज्ञःसंवत्सरःप्रजा
पतिर्मार्जयतां॥ मार्जयंतामितिवा॥ अथास्याउत्तानमंजलिमध
स्ताद्योक्रस्यनिधायात्मनश्चसव्यंपूर्णपात्रंनिनयन्वाचयेत्॥ मा
हंप्रजांपरासिचंयानःसयावरीस्थन॥ समुद्रंवोनिनयानिस्वंपा
थोअपीथ॥ वेदस्तृणान्यग्रेगृहीत्वाविधून्वंस्ततस्तृणंसव्येन
गार्हपत्याद्दाहवनीयमेति॥ तंतुतन्वन्रजसोभानुमन्विहिज्योति
ष्मतःपथोरक्षधियाकृतान्॥ अनुल्बणंवयतजोगुवामपोमनु १३
र्भवयजनयादैव्यंजनं॥ मंत्रांतेस्तृणारंभः॥ प्रत्यगुदगाहवनी

पारवस्थायस्थाल्याः स्रुवेणावदायसर्वप्रायश्चित्तानिजुहोति॥
अयाश्चाग्ने०॥ अतोदेवा०॥ इदंविष्णु०॥ भूः स्वाहा॥ भुवः स्वाहा॥
स्वः स्वाहा॥ भूर्भुवः स्वः स्वाहा॥ संस्थाजपेनोपतिष्ठंते॥ ॐ चमे
स्वरश्चमेयज्ञोपचतेनमश्च॥ यन्तेन्यूनंतस्मैतउपयन्त्वोतिरिक्तं
तस्मैतेनमः॥ ॥ दर्शपूर्णमासहोत्रप्रयोगः संपूर्णः॥ ॥
शके १७६० आश्विनकृष्णाष्टम्यांबुधेआचार्योपनाम्नामोरे
श्वरेणेदंपुस्तकंस्वार्थपरार्थमिदंपुस्तकंलिखितं॥ ॥